"KALYANA-KALPATARU",

P. O. GITA PRESS (Gorakhpur) India

Sub. No. _____

7178. Sri S. Sitaraman Agent,
Indo Commercial Bank Ltd.,
P.O. Erode

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation
Center for Shaiva Studies, Pondicherry Collection

Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

LICENSE No. A. 10

Licensed to post without pre

From

T

॥ श्रीः ॥

॥ शिवकवचम् ॥

इन्द्राक्षीस्तोत्रयुतम् ॥

मु. अ. वै. अनन्तरामशास्त्री अण्ड् ब्रदर्

इत्येताभ्यां

कुम्भघोणस्थ स्वकीय

शारदाविलासमुद्रणालये

मुद्रापितं

कुम्भघोणे प्रकाशितं च ॥

1930.

(Copyright Registered.)

Center for Shaiva Studies, Pondicherry Collection

Digitization by Agam Nigam. Funding Tattva Heritage Fo

main. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

॥ श्रीः ॥

॥ इन्द्राक्षीस्तोत्रप्रारंभः ॥

नारद उवाच—

इन्द्राक्षीस्तोत्रमाख्याहि नारायण गुणार्णव ।
पार्वत्यै शिवसंप्रोक्तं परं कौतूहलं हि मे ॥ ॥ १ ॥

नारायण उवाच—

इन्द्राक्षीस्तोत्रमन्त्रस्य माहात्म्यं केन वोच्यते ।
इन्द्रेणादौ कृतं स्तोत्रं सर्वापद्विनिवारणम् ॥ ॥ २

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fo

तदेवाहं ब्रवीम्यद्य पृच्छतस्तव नारद ॥ ॥ ३ ॥

अस्य इन्द्राक्षीस्तोत्रमहामन्त्रस्य शचीपुरन्दर ऋषिः, अनुष्टुप्छन्दः, इन्द्राक्षीदुर्गादेवता, लक्ष्मीर्बीजम्, भुवनेश्वरीशक्तिः, भवानी कीलकम्, इन्द्राक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः । इन्द्राक्षीमङ्गुष्ठाभ्यां नमः । महालक्ष्मीं तर्जनीभ्यां नमः । माहेश्वरीं मध्यमाभ्यां नमः । अंबुजाक्षीमनामिकाभ्यां नमः । कात्यायनीं कनिष्ठिकाभ्यां नमः । कौमारीं करतलकरपृष्ठाभ्यां नमः । इन्द्राक्षीं हृदयाय नमः । महालक्ष्मीं शिरसे स्वाहा । माहेश्वरीं शिखायै वषट् । अंबुजाक्षीं कवचायहुम् । कात्यायनीं नेत्रत्रयायवौषट् । कौमारीं अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम्—

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

नेत्राणां दशभिश्शतैः परिवृता मत्युग्रचर्मांबरां
हेमाभां महतीं विलंबितशिखामामुक्तकेशान्विताम् ।
घण्टामण्डितपादपद्मयुगळां नागेन्द्रकुंभस्तनी
मिन्द्राक्षीं परिचिन्तयामि मनसा सर्वार्थसिद्धिप्रदाम् ॥ ॥ ४ ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥ ॥ ५ ॥

इन्द्राक्षीं शिवयुवतिं नानालङ्कारभूषिताम् ।
प्रसन्नवदनांभोजा मप्सरोगणसेविताम् ॥ ॥ ६ ॥

पीतांबरां वज्रधरैकहस्तां नानाविधालङ्करणां प्रसन्नाम् ।
त्वामप्सरःसेवितपादपद्मा मिन्द्राक्षि वन्दे शिवधर्मपत्नीम् ॥ ७ ॥

Center for Shaiva Studies, Pondicherry Collection
Digitization by Agam Nigam. Funding Tattva Heritage Fo

इति ध्यात्वा पुरा शक्रः स्तोत्रमेतच्चकार ह ।
स्तुता शक्तिं ददौ तस्मै सेन्द्रशक्तिस्तदा भुवि ॥
प्रख्याता सर्वलोकेऽभूत् इन्द्रशक्त्यभिवर्धनात् ॥ ॥ ८ ॥
शच्याख्यशक्तियुक्तस्सः शत्रूणां पुरदारणात् ।
पुरन्दर इति ख्यातः ऋषिश्शचिपुरन्दरः ।
स्तोत्रं पठामि तत्प्रोक्तं सर्वरोगनिवारणम् ॥ ॥ ९ ॥

इन्द्र उवाच—

[वज्रिणी पूर्वतः पातु चाग्नेय्यां परमेश्वरी ।
दण्डिनी दक्षिणे पातु नैर्ऋत्यां पातु खड्गिनी ॥ ॥ १० ॥
पश्चिमे पाशधारी च ध्वजस्था वायुदिङ्मुखे ।
कौमोदकी तथोदीच्यां पात्वैशान्यां महेश्वरी ॥ ॥ ११ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

ऊर्ध्वदेशे पद्मिनी मा मधस्तात्पातु वैष्णवी ।
एवं दश दिशो रक्षेत् सर्वदा भुवनेश्वरी ॥) ॥ १२ ॥

इन्द्राक्षी नाम सा देवी दैवतैस्समुदाहृता ।
गौरी शाकम्भरी देवी दुर्गानाम्नीति विश्रुता ॥ ॥ १३ ॥

नित्यानन्दा निराहारा निष्कळायै नमोऽस्तु ते ।
कात्यायनी महादेवी छन्नघण्टा महातपाः ॥ ॥ १४ ॥

सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ।
नारायणी भद्रकाळी रुद्राणी कृष्णपिङ्गळा ॥ ॥ १५ ॥

अग्निज्वालारौद्रमुखी काळरात्रि स्तपस्विनी ।
मेघस्वना सहस्राक्षी विकटाङ्गी जडोदरी ॥ ॥ १६ ॥

Center for Shaiva Studies, Pondicherry Collection
pmain. Digitization by Agam Nigam. Funding Tattva Heritage Fo

महोदरी मुक्तकेशी घोररूपा महाबला ।
अजिता भद्रदाऽनन्ता रोगहर्त्री शिवप्रदा ॥ ॥ १७ ॥

शिवदूती कराळी च प्रत्यक्षपरमेश्वरी ।
इन्द्राणी इन्द्ररूपा च इन्द्रशक्तिः परायणी ॥ ॥ १८ ॥

सदासम्मोहिनी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी परब्रह्मी स्थूलसूक्ष्मप्रवर्द्धिनी ॥ ॥ १९ ॥

रक्ताक्षी रक्तदन्ता च रक्तमाल्यांबरा परा ।
महिषासुरहन्त्री च चामुण्डा खड्गधारिणी ॥ ॥ २० ॥

वाराही नारसिंही च भीमा भैरवनादिनी ।
श्रुतिस्स्मृतिर्द्धृतिर्मेधा विद्या लक्ष्मीस्सरस्वती ॥ ॥ २१ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता ।
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ॥ ॥ २२ ॥

शिवा भवानी रुद्राणी शङ्करार्धशरीरिणी ।
ऐरावतगजारूढा वज्रहस्ता वरप्रदा ॥ ॥ २३ ॥

नित्या सकलकल्याणी सर्वैश्वर्यप्रदायिनी ।
दाक्षायणी पद्महस्ता भारती सर्वमङ्गळा ॥ ॥ २४ ॥

कल्याणी जननी दुर्गा सर्वदुर्गतिनाशिनी ।
इन्द्राक्षी सर्वभूतेशी सर्वरूपा मनोन्मनी ॥ ॥ २५ ॥

एवं नामवरैर्देवी स्तुता शक्रेण धीमता ।
आयुरारोग्यमैश्वर्यं मपमृत्युभयापहम् ॥ ॥ २६ ॥

Center for Shaiva Studies, Pondicherry Collection
pmain. Digitization by Agam Nigam. Funding Tattva Heritage Fo

वरं प्रादान्महेन्द्राय देवराज्यं च शाश्वतम् ।
इन्द्रस्तोत्रमिदं पुण्यं महदैश्वर्यकारणम् ॥ ॥ २७ ॥

क्षयापस्मारकुष्ठादि तापज्वरनिवारणम् ।
चोरव्याघ्रभयारिष्ट वैष्णवज्वरवारणम् ॥ ॥ २८ ॥

माहेश्वरमहामारी सर्वज्वरनिवारणम् ।
शीतपैत्तकवातादि सर्वरोगनिवारणम् ॥ ॥ २९ ॥

शतमावर्तयेद्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्तयन् सहस्रं तु लभते वांछितं फलम् ॥ ॥ ३० ॥

एतत्स्तोत्रं महापुण्यं जप्यमायुष्यवर्धनम् ।
ज्वरातिसाररोगाणामपमृत्योर्हराय च ॥ ॥ ३१ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

ज्वरातिसाररोगाणामपमृत्योर्हराय च ॥ ॥ ३१ ॥

द्विजैर्नित्यमिदं जप्यं भाग्यारोग्यमभीप्सुभिः ।
महिषमस्तकनृत्यविनोदनस्फुटरणन्मणिनूपुरपादुका ।
जननरक्षणमोक्षविधायिनी जयतु शुम्भनिशुम्भनिषूदिनी ॥ ३२॥ ॥

सर्वमङ्गळमाङ्गळ्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

ओम् ह्रीं श्रीं इन्द्राक्ष्यै नमः । ओन्नमो भगवति इन्द्राक्षि स-
र्वजनसम्मोहिनि कालरात्रि नारसिंहि सर्वशत्रुसंहारिणि अनले अभ-
ये अजिते अपराजिते महासिंहवाहिनि महिषासुरमर्दिनि हनहन म-
र्दय मर्दय मारय मारय शोषय शोषय दाहय दाहय महाग्रहान्
संहर संहर भूतवेताळग्रहान् संहर संहर यक्षग्रह राक्षसग्रह स्क-

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

न्दग्रह विनायकग्रह बालग्रह कुमारग्रह भूतग्रह प्रेतग्रह पिशाचग्रह-
कूष्माण्डग्रहादीन् मर्दय मर्दय भूतज्वर प्रेतज्वर पिशाचज्वरान्
संहर संहर धूमभूतान् सन्द्रावय सन्द्रावय शिरश्शूल कटिशूला-
ङ्गशूलपार्श्वशूल पाण्डुरोगादीन् संहर संहर यरलवशषसह सर्वग्र-
हान् तापय तापय संहर संहर छेदय छेदय ह्रां ह्रीं ह्रूं फट्स्वाहा ॥

इति इन्द्राक्षीस्तोत्रम् ॥

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

॥ श्रीः ॥

इन्द्राक्षीयन्त्रम् ॥

वृत्ताकारं त्रिकोणं च तन्मध्ये चाष्टकोणकम् ।
तत्पार्श्वे साध्यनामाथ कोणाग्रे शूलमालिखेत् ॥ ॥ १ ॥

वृत्तमध्ये तु ह्रीङ्कारं शूलाग्रे प्रणवं लिखेत् ।
इन्द्राक्षीयन्त्रमेतच्च प्रणवेनाथ वेष्टयेत् ॥ ॥ २ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

॥ श्रीः ॥

शिवकवचस्तोत्रप्रारंभः ॥

अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य, ऋषभयोगीश्वरऋषिः, अनुष्टुप्छन्दः, श्रीसांबसदाशिवो देवता, ओं वीजम्, नमश्शक्तिः, शिवायेति कीलकम् । मम श्रीसांबसदाशिव प्रसादसिद्ध्यर्थे जपे विनियोगः । ओं सदाशिवाय अंगुष्ठाभ्यां नमः । नं गङ्गाधराय तर्जनीभ्यां नमः । मं मृत्युञ्जयाय मध्यमाभ्यां नमः । शिं शूलपाणये अनामिकाभ्यां नमः । वां पिनाकपाणये कनिष्ठिकाभ्यां नमः । यं उमापतये करतलकरपृष्ठाभ्यां नमः । ओं सदाशिवाय हृदयाय

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

नमः । नं गङ्गाधराय शिरसे स्वाहा । मं मृत्युञ्जयाय शिखायै व-
षट् । शिं शूलपाणये कवचाय हुम् । वां पिनाकपाणये नेत्रत्रयाय
वौषट् । यं उमापतये अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम्—

वज्रदंष्ट्रं त्रिनयनं कालकण्ठ मरिन्दमम् ।
सहस्रकरमत्युग्रं वन्दे शंभुमुमापतिम् ॥ ॥ १ ॥

रुद्राक्षकङ्कणलसद्भुजदण्डयुग्मःफालान्तराळसितभस्मलसत्त्रिपुण्ड्रः ।
पञ्चाक्षरं परिपठन्वरमन्त्रराजं ध्यायन्सदा पशुपतिं शरणं व्रजेथाः ॥

अथापरं सर्वपुराणगुह्यं निश्शेषपापौघहरं पवित्रम् ।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ॥ ॥ २ ॥

ऋषभ उवाच—

Center for Shaiva Studies, Pondicherry Collection
Digitization by Agam Nigam. Funding Tattva Heritage Foundation

नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ ॥ ४ ॥

शुचौ देशे समासीनो यथावत् कल्पितासनः ।
जितेन्द्रियो जितप्राणः चिन्तयेच्छिवमव्ययम् ॥ ॥ ५ ॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोवकाशम्
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत्परानन्दमयं महेशम् ॥ ॥ ६ ॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात् कवचेन रक्षाम् ॥ ७ ॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ॥ ८ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

सर्वत्र मां रक्षतु विश्वमूर्ति ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीया नुरुशक्ति रेकः स ईश्वरः पातु भयादशेषात् ॥ ९ ॥

यो भूस्वरूपेण बिभर्ति विश्वं पायात् स भूमेर्गिरिशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्ने र्वात्यादिभीते रखिलाच्च तापात् ॥११॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम् ॥ १२ ॥

कुठारखेटांकुशशूलढक्का कपालपाशाक्षगुणान् दधानः ।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥१३॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्याम् ॥१४॥

वराक्षमालाभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १५ ॥

वेदाभयेष्टांकुशटङ्कपाश कपालढक्काक्षकशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्मा मीशान ऊर्ध्वं परमप्रकाशः ॥ १६ ॥

मूर्द्धानमव्यान्मम चन्द्रमौलिः फालं ममव्यादथ फालनेत्रः ।
नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १७ ॥

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १८ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः ।
दोर्मूलमव्यान्मम धर्मबाहुर्वक्षस्थलं दक्षमखान्तकोऽव्यात् ॥ १९ ॥

ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ २० ॥

ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोऽव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात् पादौ ममाव्यात् सुरवन्द्यपादः ॥ २१ ॥

महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ।
त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥ २२ ॥

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २३ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

अन्तस्थितं रक्षतु शङ्करो मां स्थाणुस्सदा पातु बहिस्थितं माम् ।
तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥ २४ ॥

तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवश्शयानम् ॥२५॥

मार्गेषु मां रक्षतु नीलकण्ठश्शैलादिदुर्गेषु पुरत्रयारिः ।
अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ ॥ २६ ॥

कल्पान्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः ।
घोरारिसेनार्णवदुर्निवार महाभयाद्रक्षतु वीरभद्रः ॥ ॥ २७ ॥

पत्यश्वमातङ्गघटावरूथिनी सहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

निहन्तु दस्यून् प्रळयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूलसिंहर्क्षवृकादिहिंस्रान् सन्त्रासयत्वीशधनुः पिनाकः ॥ २९ ॥
दुस्स्वप्नदुश्शकुनदुर्गतिदौर्मनस्य दुर्भिक्षदुर्व्यसनदुस्सहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्चनाशयतुमेजगतामधीशः॥

ओं नमो भगवते सदाशिवाय सकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकललोकवरप्रदाय सकलदुरितार्तिभञ्जनाय सकलजगदभयङ्कराय सकललोकैकशङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निराकाराय निराभासाय निरामयाय निरातङ्काय निष्कळङ्काय निष्प्रपञ्चाय निर्द्वंद्वाय निस्सङ्गाय निर्गुणाय निरुपमविभवाय निराधाराय नित्यशु-

द्धबुद्धपरिपूर्णसच्चिदानन्दाद्वयाय परमशान्तप्रकाशाय तेजोरूपाय तेजोमयाय तेजोधिपतये जयजय रुद्र महारुद्र महारौद्र भद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपालमालाधर खट्वाङ्गचर्मखड्ग-धर परशुपाशांकुशडमरुत्रिशूलचापवाण गदाशक्ति भिण्डिपाल तो-मरमुसलभुसुण्ठीमुद्गरप्रासपरिघशतघ्नी चक्राद्यायुधभीषणकर सह-स्रमुख दंष्ट्राकराळवदन विकटाट्टहासविस्फोटितब्रह्माण्डमण्डल ना-गेन्द्रकुण्डल नागेन्द्रवलयनागेन्द्रहार नागेन्द्रचर्मधर मृत्युञ्जय त्र्यंबक त्रिपुरान्तक विरूपाक्ष विश्वेश्वर वृषभवाहन विषभूषण विश्वरूप वि-श्वतोमुख सर्वतोमुख मां रक्ष रक्ष ज्वलज्वल प्रज्वल प्रज्वल महा-मृत्युभयं नाशय नाशय रोगभयमुत्सारयोत्सारय विषसर्पभयं शमय शमय चोरान्मारय मारय मम शत्रूंनुच्चाटयोच्चाटय शूलेन विदारय

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

विदारय कुठारेण भिन्धि भिन्धि खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय बाणेन सन्ताडय सन्ताडय रक्षांसि भीषय भीषय भूतानि विद्रावय विद्रावय कूश्माण्डभूतभेताळमारीगण ब्रह्मराक्षसान् सन्त्रासय सन्त्रासय ममाभयं कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय दुःखातुरं मामानन्दयानन्दय क्षुत्तृष्णार्तं मामाप्याययाप्याययं अमृतकटाक्षवीक्षणेन मां सञ्जीवय सञ्जीवय नरकभयान्मामुद्धरोद्धर शिवकवचेनमामाच्छादयाच्छादय मृत्युञ्जय त्र्यम्बक सदाशिव नमस्ते नमस्ते ॥

इत्येतत् परमं शैवं कवचं व्याहृतं मया ।
सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥ ॥ ३१ ॥

य स्सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् ।
न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥ ॥ ३२ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा ।
सद्यस्सुखमवाप्नोति दीर्घमायुश्च विन्दति ॥ ॥ ३३ ॥

सर्वदारिद्र्यशमनं सौमङ्गल्यविवर्धनम् ।
योधत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ॥ ३४ ॥

महापातकसङ्घातैः मुच्यते चोपपातकैः ।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥ ॥ ३५ ॥

त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् ।
धारयस्व मया दत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ॥ ३६ ॥

श्रीसूतः—

इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ।
ददौ शङ्खं महारावं खड्गं चारिनिषूदनम् ॥ ॥ ३७ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

पुनश्च भस्म सम्मन्त्र्य तदङ्गं परितोऽस्पृशत् ।
गजानां षट्सहस्रस्य द्विगुणस्य बलं ददौ ॥ ॥ ३८ ॥

भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृतिः ।
स राजपुत्रश्शुशुभे शरदर्क इव श्रिया ॥ ॥ ३९ ॥

तमाह प्राञ्जलिं भूयः स योगी नृपनन्दनम् ।
एष खड्गो मया दत्तः तपोमन्त्रानुभावतः ॥ ॥ ४० ॥

शितधारमिमं खड्गं यस्मै दर्शयसे स्फुटम् ।
स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ॥ ४१ ॥

एष शङ्खो मया दत्तः तपोमन्त्रानुभावतः ।
अस्य शङ्खस्य निर्ह्रादं ये शृण्वन्ति तवाहिताः ।

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

ते मूर्च्छिताः पतिष्यन्ति न्यस्तशस्त्रा विचेतनाः ॥ ॥ ४२ ॥

खड्गशङ्खाविमौ दिव्यौ परसैन्यविनाशिनौ ।
आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्द्धनौ ॥ ॥ ४३ ॥

एतयोश्च प्रभावेन शैवेन कवचेन च ।
द्विषट्सहस्रनागानां बलेन महताऽपि च ॥ ॥ ४४ ॥

भस्मधारणसामर्थ्यात् शत्रुसैन्यं विजेष्यसि ।
प्राप्य सिंहासनं पित्र्यं गोप्तासि पृथिवीमिमाम् ॥ ॥ ४५ ॥

इति भद्रायुषं सम्यगनुशास्य समातृकम् ।
ताभ्यां सम्पूजितस्सोऽथ योगी स्वैरगतिर्ययौ ॥ ॥ ४६ ॥

इति ब्रह्मोत्तरखण्डगतं शिवकवचस्तोत्रं समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

॥ श्रीः ॥

॥ दक्षिणामूर्तिस्तोत्रप्रारम्भः ॥

मौनव्याख्याप्रकटितपरब्रह्मतत्वं युवानं
वर्षिष्ठांतेवसदृषिगणै रावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दरूपं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥ ॥ १ ॥

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ २ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Fou

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ३ ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ४ ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते ।

Center for Shaiva Studies, Pondicherry Collection
pmain. Digitization by Agam Nigam. Funding Tattva Heritage Found

जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ५ ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ६ ॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ७ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ८ ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ ९ ॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ॥ १० ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ ॥ ११ ॥

वटविटपिसमीपे भूमिभागे निषण्णं
सकलमुनिजनानां ज्ञानदातारमारात् ।
त्रिभुवनगुरुमीशं दक्षिणामूर्तिदेवं
जननमरणदुःखच्छेददक्षं नमामि ॥ ॥ १२ ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

चित्रं वटतरोर्मूले वृद्धाश्शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः ॥ ॥ १३ ॥
ॐ नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मूलाय प्रशान्ताय दक्षिणामूर्तये नमः ॥ ॥ १४ ॥
गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥ ॥ १५ ॥
[मुद्रापुस्तकवह्निनागविलसद्बाहुं प्रसन्नाननं
मुक्ताहारविभूषितं शशिकलाभास्वज्जटामण्डलम् ।
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तनिवासिनं परगुरुं ध्यायाम्यभीष्टाप्तये ॥ ॥ १६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं श्रीदक्षिणामूर्तिस्तोत्रम् ॥

Center for Shaiva Studies, Pondicherry Collection
Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foun

Center for Shaiva Studies, Pondicherry Collection

Domain. Digitization by Agam Nigam. Funding Tattva Heritage Found

Center for Shaiva Studies, Pondicherry Collection